# শ্রীরামসহস্রনামম্ শ্রীমদানন্দরামাযণে

{॥ শ্রীরামসহস্রনামম্ শ্রীমদানন্দরামাযণে ॥}

শ্রীপার্বত্যুবাচ

শ্রোতুমিচ্ছামি দেবেশ তদহং সর্বকামদম্ ।

নাম্নাং সহস্রং মাং ব্রূহি যদস্তি ময়ি তে দযা ॥ ২৮॥

শ্রীমহাদেব উবাচ

অথ বক্ষ্যামি ভো দেবি রামনামসহস্রকম্ ।

শৃণুষ্বৈকমনাঃ স্তোত্রং গুহ্যাদ্গুহ্যতরং মহত্ ॥ ২৯॥

ঋষির্বিনাযকশ্চাস্য হ্যনুষ্টুপ্ ছন্দ উচ্যতে ।

পরব্রহ্মাত্মকো রামো দেবতা শুভদর্শনে ॥ ৩০॥

ॐ অস্য শ্রীরামসহস্রনামমালামন্ত্রস্য বিনাযক ঋষিঃ ।

অনুষ্টুপ্ ছন্দঃ । শ্রীরামো দেবতা ।

মহাবিষ্ণুরিতি বীজম্ । গুণভৃন্নির্গুণো মহানিতি শক্তিঃ ।

সচ্চিদানন্দবিগ্রহ ইতি কীলকম্ ।

শ্রীরামপ্রীত্যর্থে জপে বিনিযোগঃ ॥

আঙ্গুলিন্যাসঃ

ॐ শ্রীরামচন্দ্রায অঙ্গুষ্ঠাভ্যাং নমঃ ।

সীতাপতযে তর্জনীভ্যাং নমঃ ।

রঘুনাথায মধ্যমাভ্যাং নমঃ ।

ভরতাগ্রজায অনামিকাভ্যাং নমঃ ।

দশরথাত্মজায কনিষ্ঠিকাভ্যাং নমঃ ।

হনুমৎপ্রভবে করতলকরপৃষ্ঠাভ্যাং নমঃ ॥

হৃদযাদিন্যাসঃ

ওঁ শ্রীরামচন্দ্রায হৃদযায নমঃ ।

সীতাপতযে শিরসে স্বাহা ।

রঘুনাথায শিখাযৈ বষট্ ।

ভরতাগ্রজায কবচায হুম্ ।

দশরথাত্মজায নেত্রত্রযায বৌষট্ ।

হনুমৎপ্রভবে অস্ত্রায ফট্ ॥

অথ ধ্যানম্ ।

ধ্যাযেদাজানুবাহুং ধৃতশরধনুষং বদ্ধপদ্মাসনস্থং

পীতং বাসো বসানং নবকমলস্পর্ধি নেত্রং প্রসন্নম্ ।

বামাঙ্কারূঢসীতামুখকমলমিলল্লোচনং নীরদাভং

নানালঙ্কারদীপ্তং দধতমুরুজটামণ্ডলং রামচন্দ্রম্ ॥ ৩১॥

বৈদেহীসহিতং সুরদ্রুমতলে হৈমে মহামণ্ডপে

মধ্যে পুষ্পকমাসনে মণিমযে বীরাসনে সংস্থিতম্ ।

অগ্রে বাচযতি প্রভঞ্জনেসুতে তত্ত্বং মুনিভ্যঃ পরং

ব্যাখ্যান্তং ভরতাদিভিঃ পরিবৃতং রামং ভজে শ্যামলম্ ॥ ৩২ ॥

সৌবর্ণমণ্ডপে দিব্যে পুষ্পকে সুবিরাজিতে ।

মূলে কল্পতরোঃ স্বর্ণপীঠে সিংহাষ্টসংযুতে ॥ ৩৩॥

মৃদুশ্লক্ষ্ণতরে তত্র জানক্যা সহ সংস্থিতম্ ।

রামং নীলোৎপলশ্যামং দ্বিভুজং পীতবাসসম্ ॥ ৩৪ ॥

স্মিতবক্ত্রং সুখাসীনং পদ্মপত্রনিভেক্ষণম্ ।

কিরীটহারকেয়ূরকুণ্ডলৈঃ কটকাদিভিঃ ॥ ৩৫ ॥

ভ্রাজমানং জ্ঞানমুদ্রাধরং বীরাসনস্থিতম্ ।

স্পৃশন্তং স্তনযোরগ্রে জানক্যাঃ সব্যপাণিনা ॥ ৩৬॥

বসিষ্ঠবামদেবাদ্যৈঃ সেবিতং লক্ষ্মণাদিভিঃ ।

অযোধ্যানগরে রম্যে হ্যভিষিক্তং রঘূদ্বহম্ ॥ ৩৭॥

এবং ধ্যাত্বা জপেন্নিত্যং রামনামসহস্রকম্ ।

হত্যাকোটিযুতো বাপি মুচ্যতে নাত্র সংশযঃ ॥ ৩৮॥

(অথ সহস্রনাম স্তোত্র প্রারম্ভঃ ।)

ওঁ রামঃ শ্রীমান্মহাবিষ্ণুর্জিষ্ণুর্দেবহিতাবহঃ ।

তত্ত্বাত্মা তারকব্রহ্ম শাশ্বতঃ সর্বসিদ্ধিদঃ ॥ ৩৯॥

রাজীবলোচনঃ শ্রীমান্ শ্রীরামো রঘুপুঙ্গবঃ ।

রামভদ্রঃ সদাচারো রাজেন্দ্রো জানকীপতিঃ ॥ ৪০॥

অগ্রগণ্যো বরেণ্যশ্চ বরদঃ পরমেশ্বরঃ ।

জনার্দনো জিতামিত্রঃ পরার্থৈকপ্রয়োজনঃ ॥ ৪১॥

বিশ্বামিত্রপ্রিয়ো দাতা শত্রুজিচ্ছত্রুতাপনঃ ।

সর্বজ্ঞঃ সর্ববেদাদিঃ শরণ্যো বালিমর্দনঃ ॥ ৪২॥

জ্ঞানভব্যোঽপরিচ্ছেদ্যো বাগ্মী সত্যব্রতঃ শুচিঃ ।

জ্ঞানগম্যো দৃঢপ্রজ্ঞঃ খরধ্বংসঃ প্রতাপবান্ ॥ ৪৩॥

দ্যুতিমানাত্মবান্ বীরো জিতক্রোধোঽরিমর্দনঃ ।

বিশ্বরূপো বিশালাক্ষঃ প্রভুঃ পরিবৃঢো দৃঢঃ ॥ ৪৪॥

ঈশঃ খড্গধরঃ শ্রীমান্ কৌসল্যেয়োঽনসূয়কঃ ।

বিপুলাংসো মহোরস্কঃ পরমেষ্ঠী পরায়ণঃ ॥ ৪৫॥

সত্যব্রতঃ সত্যসন্ধো গুরুঃ পরমধার্মিকঃ ।

লোকেশো লোকবন্দ্যশ্চ লোকাত্মা লোককৃদ্বিভুঃ ॥ ৪৬॥

অনাদির্ভগবান্ সেব্যো জিতমাযো রঘূদ্বহঃ ।

রামো দযাকরো দক্ষঃ সর্বজ্ঞঃ সর্বপাবনঃ ॥ ৪৭॥

ব্রহ্মণ্যো নীতিমান্ গোপ্তা সর্বদেবমযো হরিঃ ।

সুন্দরঃ পীতবাসাশ্চ সূত্রকারঃ পুরাতনঃ ॥ ৪৮॥

সৌম্যো মহর্ষিঃ কোদণ্ডঃ সর্বজ্ঞঃ সর্বকোবিদঃ ।

কবিঃ সুগ্রীববরদঃ সর্বপুণ্যাধিকপ্রদঃ ॥ ৪৯॥

ভব্যো জিতারিষড্বর্গো মহোদারোঽঘনাশনঃ ।

সুকীর্তিরাদিপুরুষঃ কান্তঃ পুণ্যকৃতাগমঃ ॥ ৫০॥

অকল্মষশ্চতুর্বাহুঃ সর্বাবাসো দুরাসদঃ । 100

স্মিতভাষী নিবৃত্তাত্মা স্মৃতিমান্ বীর্যবান্ প্রভুঃ ॥ ৫১॥

ধীরো দান্তো ঘনশ্যামঃ সর্বাযুধবিশারদঃ ।

অধ্যাত্মযোগনিলযঃ সুমনা লক্ষ্মণাগ্রজঃ ॥ ৫২॥

সর্বতীর্থমযঃ শূরঃ সর্বযজ্ঞফলপ্রদঃ ।

যজ্ঞস্বরূপো যজ্ঞেশো জরামরণবর্জিতঃ ॥ ৫৩॥

বর্ণাশ্রমগুরুর্বর্ণী শত্রুজিৎপুরুষোত্তমঃ ।

শিবলিঙ্গপ্রতিষ্ঠাতা পরমাত্মা পরাপরঃ ॥ ৫৪॥

প্রমাণভূতো দুর্জ্ঞেয়ঃ পূর্ণঃ পরপুরঞ্জয়ঃ ।

অনন্তদৃষ্টিরানন্দো ধনুর্বেদো ধনুর্ধরঃ ॥ ৫৫॥

গুণাকারো গুণশ্রেষ্ঠঃ সচ্চিদানন্দবিগ্রহঃ ।

অভিবাদ্যো মহাকায়ো বিশ্বকর্মা বিশারদঃ ॥ ৫৬॥

বিনীতাত্মা বীতরাগস্তপস্বীশো জনেশ্বরঃ ।

কল্যাণঃ প্রহ্বতিঃ কল্পঃ সর্বেশঃ সর্বকামদঃ ॥ ৫৭॥

অক্ষয়ঃ পুরুষঃ সাক্ষী কেশবঃ পুরুষোত্তমঃ ।

লোকাধ্যক্ষো মহাকার্যো বিভীষণবরপ্রদঃ ॥ ৫৮॥

আনন্দবিগ্রহো জ্যোতির্হনুমৎপ্রভুরব্যয়ঃ ।

ভ্রাজিষ্ণুঃ সহনো ভোক্তা সত্যবাদী বহুশ্রুতঃ ॥ ৫৯॥

সুখদঃ কারণং কর্তা ভববন্ধবিমোচনঃ ।

দেবচূডামণির্নেতা ব্রহ্মণ্যো ব্রহ্মবর্ধনঃ ॥ ৬০॥

সংসারতারকো রামঃ সর্বদুঃখবিমোক্ষকৃত্ ।

বিদ্বত্তমো বিশ্বকর্তা বিশ্বকৃদ্বিশ্বকর্ম চ ॥ ৬১॥

নিত্যো নিয়তকল্যাণঃ সীতাশোকবিনাশকৃত্ ।

কাকুৎস্থঃ পুণ্ডরীকাক্ষো বিশ্বামিত্রভযাপহঃ ॥ ৬২ ॥

মারীচমথনো রামো বিরাধবধপণ্ডিতঃ ।

দুঃস্বপ্ননাশনো রম্যঃ কিরীটী ত্রিদশাধিপঃ ॥ ৬৩॥

মহাধনুর্মহাকাযো ভীমো ভীমপরাক্রমঃ ।

তত্ত্বস্বরূপস্তত্ত্বজ্ঞস্তত্ত্ববাদী সুবিক্রমঃ ॥ ৬৪ ॥

ভূতাত্ম ভূতকৃৎস্বামী কালজ্ঞানী মহাবপুঃ ।

অনির্বিণ্ণো গুণগ্রামো নিষ্কলঙ্কঃ কলঙ্কহা ॥ ৬৫॥

স্বভাবভদ্রঃ শত্রুঘ্নঃ কেশবঃ স্থাণুরীশ্বরঃ ।

ভূতাদিঃ শংভুরাদিত্যঃ স্থবিষ্ঠঃ শাশ্বতো ধ্রুবঃ ॥ ৬৬॥

কবচী কুণ্ডলী চক্রী খড্গী ভক্তজনপ্রিযঃ ।

অমৃত্যুর্জন্মরহিতঃ সর্বজিৎসর্বগোচরঃ ॥ ৬৭॥

অনুত্তমোঽপ্রমেযাত্মা সর্বাত্মা গুণসাগরঃ । 200

রামঃ সমাত্মা সমগো জটামুকুটমণ্ডিতঃ ॥ ৬৮॥

অজেযঃ সর্বভূতাত্মা বিষ্বক্সেনো মহাতপাঃ ।

লোকাধ্যক্ষো মহাবাহুরমৃতো বেদবিত্তমঃ ॥ ৬৯॥

সহিষ্ণুঃ সদ্গতিঃ শাস্তা বিশ্বযোনির্মহাদ্যুতিঃ ।

অতীন্দ্র ঊর্জিতঃ প্রাংশুরুপেন্দ্রো বামনো বলিঃ ॥ ৭০॥

ধনুর্বেদো বিধাতা চ ব্রহ্মা বিষ্ণুশ্চ শঙ্করঃ ।

হংসো মরীচির্গোবিন্দো রত্নগর্ভো মহদ্দ্যুতিঃ ॥ ৭১॥ var মহাদ্যুতিঃ

ব্যাসো বাচস্পতিঃ সর্বদর্পিতাসুরমর্দনঃ ।

জানকীবল্লভঃ শ্রীমান্ প্রকটঃ প্রীতিবর্ধনঃ ॥ ৭২॥

সংভবোঽতীন্দ্রিযো বেদ্যো নির্দেশো জাম্ববৎপ্রভুঃ ।

মদনো মন্মথো ব্যাপী বিশ্বরূপো নিরঞ্জনঃ ॥ ৭৩॥

নারাযণোঽগ্রণী সাধুর্জটাযুপ্রীতিবর্ধনঃ ।

নৈকরূপো জগন্নাথঃ সুরকার্যহিতঃ প্রভুঃ ॥ ৭৪॥

জিতক্রোধো জিতারাতিঃ প্লবগাধিপরাজ্যদঃ ।

বসুদঃ সুভুজো নৈকমাযো ভব্যঃ প্রমোদনঃ ॥ ৭৫॥

চণ্ডাংশুঃ সিদ্ধিদঃ কল্পঃ শরণাগতবৎসলঃ ।

অগদো রোগহর্তা চ মন্ত্রজ্ঞো মন্ত্রভাবনঃ ॥ ৭৬॥

সৌমিত্রিবৎসলো ধুর্যো ব্যক্তাব্যক্তস্বরূপধৃক্ ।
বসিষ্ঠো গ্রামণীঃ শ্রীমাননুকূলঃ প্রিয়ংবদঃ ॥ ৭৭॥

অতুলঃ সাত্ত্বিকো ধীরঃ শরাসনবিশারদঃ ।
জ্যেষ্ঠঃ সর্বগুণোপেতঃ শক্তিমাংস্তাটকান্তকঃ ॥ ৭৮॥

বৈকুণ্ঠঃ প্রাণিনাং প্রাণঃ কমলঃ কমলাধিপঃ ।
গোবর্ধনধরো মৎস্যরূপঃ কারুণ্যসাগরঃ ॥ ৭৯॥

কুম্ভকর্ণপ্রভেত্তা চ গোপিগোপালসংবৃতঃ । 300
মায়াবী ব্যাপকো ব্যাপী রেণুকেয়বলাপহঃ ॥ ৮০॥

পিনাকমথনো বন্দ্যঃ সমর্থো গরুডধ্বজঃ ।
লোকত্রয়াশ্রয়ো লোকভরিতো ভরতাগ্রজঃ ॥ ৮১॥

শ্রীধরঃ সঙ্গতির্লোকসাক্ষী নারায়ণো বিভুঃ ।
মনোরূপী মনোবেগী পূর্ণঃ পুরুষপুঙ্গবঃ ॥ ৮২॥

যদুশ্রেষ্ঠো যদুপতির্ভূতাবাসঃ সুবিক্রমঃ ।
তেজোধরো ধরাধরশ্চতুর্মূর্তির্মহানিধিঃ ॥ ৮৩॥

চাণূরমথনো বন্দ্যঃ শান্তো ভরতবন্দিতঃ ।

শব্দাতিগো গভীরাত্মা কোমলাঙ্গঃ প্রজাগরঃ ॥ ৮৪॥

লোকোর্ধ্বগঃ শেষশায়ী ক্ষীরাব্ধিনিলয়োঽমলঃ ।

আত্মজ্যোতিরদীনাত্মা সহস্রার্চিঃ সহস্রপাত্ ॥ ৮৫॥

অমৃতাংশুর্মহীগর্তো নিবৃত্তবিষয়স্পৃহঃ ।

ত্রিকালজ্ঞো মুনিঃ সাক্ষী বিহায়সগতিঃ কৃতী ॥ ৮৬॥

পর্জন্যঃ কুমুদো ভূতাবাসঃ কমললোচনঃ ।

শ্রীবৎসবক্ষাঃ শ্রীবাসো বীরহা লক্ষ্মণাগ্রজঃ ॥ ৮৭॥

লোকাভিরামো লোকারিমর্দনঃ সেবকপ্রিয়ঃ ।

সনাতনতমো মেঘশ্যামলো রাক্ষসান্তকঃ ॥ ৮৮॥

দিব্যায়ুধধরঃ শ্রীমানপ্রমেয়ো জিতেন্দ্রিয়ঃ ।

ভূদেববন্দ্যো জনকপ্রিয়কৃৎপ্রপিতামহঃ ॥ ৮৯॥

উত্তমঃ সাত্বিকঃ সত্যঃ সত্যসন্ধস্ত্রিবিক্রমঃ ।

সুবৃত্তঃ সুগমঃ সূক্ষ্মঃ সুঘোষঃ সুখদঃ সুহৃত্ ॥ ৯০॥

দামোদরোঽচ্যুতঃ শার্ঙ্গী বামনো মথুরাধিপঃ ।

দেবকীনন্দনঃ শৌরিঃ শূরঃ কৈটভমর্দনঃ ॥ ৯১॥

সপ্ততালপ্রভেত্তা চ মিত্রবংশপ্রবর্ধনঃ ।

কালস্বরূপী কালাত্মা কালঃ কল্যাণদঃ কলিঃ ॥ ৯২॥ 400

সংবৎসরো ঋতুঃ পক্ষো হ্যয়নং দিবসো যুগঃ ।

স্তব্যো বিবিক্তো নির্লেপঃ সর্বব্যাপী নিরাকুলঃ ॥ ৯৩॥

অনাদিনিধনঃ সর্বলোকপূজ্যো নিরাময়ঃ ।

রসো রসজ্ঞঃ সারজ্ঞো লোকসারো রসাত্মকঃ ॥ ৯৪॥

সর্বদুঃখাতিগো বিদ্যারাশিঃ পরমগোচরঃ ।

শেষো বিশেষো বিগতকল্মষো রঘুপুঙ্গবঃ ॥ ৯৫॥

বর্ণশ্রেষ্ঠো বর্ণভাব্যো বর্ণো বর্ণগুণোজ্জ্বলঃ ।

কর্মসাক্ষী গুণশ্রেষ্ঠো দেবঃ সুরবরপ্রদঃ ॥ ৯৬॥

দেবাধিদেবো দেবর্ষির্দেবাসুরনমস্কৃতঃ ।

সর্বদেবময়শ্চক্রী শার্ঙ্গপাণী রঘূত্তমঃ ॥ ৯৭॥

মনোগুপ্তিরহঙ্কারঃ প্রকৃতিঃ পুরুষোঽব্যয়ঃ ।

ন্যায়ো ন্যায়ী নয়ী শ্রীমান্ নয়ো নগধরো ধ্রুবঃ ॥ ৯৮॥

***Stotram Digitalized By [Sanskritdocuments.org](https://sanskritdocuments.org)***

লক্ষ্মীবিশ্বম্ভরো ভর্তা দেবেন্দ্রো বলিমর্দনঃ ।
বাণারিমর্দনো যজ্বানুত্তমো মুনিসেবিতঃ ॥ ৯৯॥

দেবাগ্রণীঃ শিবধ্যানতৎপরঃ পরমঃ পরঃ ।
সামগেযঃ প্রিযঃ শূরঃ পূর্ণকীর্তিঃ সুলোচনঃ ॥ ১০০॥

অব্যক্তলক্ষণো ব্যক্তো দশাস্যদ্বিপকেসরী ।
কলানিধিঃ কলানাথঃ কমলানন্দবর্ধনঃ ॥ ১০১॥

পুণ্যঃ পুণ্যাধিকঃ পূর্ণঃ পূর্বঃ পূরযিতা রবিঃ ।
জটিলঃ কল্মষধ্বান্তপ্রভঞ্জনবিভাবসুঃ ॥ ১০২॥

জযী জিতারিঃ সর্বাদিঃ শমনো ভবভঞ্জনঃ ।
অলঙ্করিষ্ণুরচলো রোচিষ্ণুর্বিক্রমোত্তমঃ ॥ ১০৩॥

আশুঃ শব্দপতিঃ শব্দগোচরো রঞ্জনো লঘুঃ ।
নিঃশব্দপুরুষো মাযো স্থূলঃ সূক্ষ্মো বিলক্ষণঃ ॥ ১০৪॥ 500

আত্মযোনিরযোনিশ্চ সপ্তজিহ্বঃ সহস্রপাত্ ।
সনাতনতমঃ স্রগ্বী পেশলো বিজিতাংবরঃ ॥ ১০৫॥

শক্তিমান্ শঙ্খভৃন্নাথো গদাধররথাঙ্গভৃত্ ।

নিরীহো নির্বিকল্পশ্চ চিদ্রূপো বীতসাধ্বসঃ ॥ ১০৬॥

সনাতনঃ সহস্রাক্ষঃ শতমূর্তির্ঘনপ্রভঃ ।

হৃৎপুণ্ডরীকশযনঃ কঠিনো দ্রব এব চ ॥ ১০৭॥

সূর্যো গ্রহপতিঃ শ্রীমান্ সমর্থোঽনর্থনাশনঃ ।

অধর্মশত্রু রক্ষোঘ্নঃ পুরুহূতঃ পুরস্তুতঃ ॥ ১০৮॥

ব্রহ্মগর্ভো বৃহদ্গর্ভো ধর্মধেনুর্ধনাগমঃ ।

হিরণ্যগর্ভো জ্যোতিষ্মান্ সুললাটঃ সুবিক্রমঃ ॥ ১০৯॥

শিবপূজারতঃ শ্রীমান্ ভবানীপ্রিযকৃদ্বশী ।

নরো নারাযণঃ শ্যামঃ কপর্দী নীললোহিতঃ ॥ ১১০॥

রুদ্রঃ পশুপতিঃ স্থাণুর্বিশ্বামিত্রো দ্বিজেশ্বরঃ ।

মাতামহো মাতরিশ্বা বিরিঞ্চির্বিষ্টরশ্রবাঃ ॥ ১১১॥

অক্ষোভ্যঃ সর্বভূতানাং চণ্ডঃ সত্যপরাক্রমঃ ।

বালখিল্যো মহাকল্পঃ কল্পবৃক্ষঃ কলাধরঃ ॥ ১১২॥

নিদাঘস্তপনো মেঘঃ শুক্রঃ পরবলাপহৃত্ ।

বসুশ্রবাঃ কব্যবাহঃ প্রতপ্তো বিশ্বভোজনঃ ॥ ১১৩॥

রামো নীলোৎপলশ্যামো জ্ঞানস্কন্দো মহাদ্যুতিঃ ।

কবন্ধমথনো দিব্যঃ কম্বুগ্রীবঃ শিবপ্রিয়ঃ ॥ ১১৪॥

সুখী নীলঃ সুনিষ্পন্নঃ সুলভঃ শিশিরাত্মকঃ ।

অসংসৃষ্টোঽতিথিঃ শূরঃ প্রমাথী পাপনাশকৃত্ ॥ ১১৫॥

পবিত্রপাদঃ পাপারির্মণিপূরো নভোগতিঃ ।

উত্তারণো দুষ্কৃতিহা দুর্ধর্ষো দুঃসহো বলঃ ॥ ১১৬॥ 600

অমৃতেশোঽমৃতবপুর্ধর্মী ধর্মঃ কৃপাকরঃ ।

ভগো বিবস্বানাদিত্যো যোগাচার্যো দিবস্পতিঃ ॥ ১১৭॥

উদারকীর্তিরুদ্যোগী বাঙ্ময়ঃ সদসন্ময়ঃ ।

নক্ষত্রমানী নাকেশঃ স্বাধিষ্ঠানঃ ষডাশ্রয়ঃ ॥ ১১৮॥

চতুর্বর্গফলং বর্ণশক্তিত্রয়ফলং নিধিঃ ।

নিধানগর্ভো নির্ব্যাজো নিরীশো ব্যালমর্দনঃ ॥ ১১৯॥

শ্রীবল্লভঃ শিবারংভঃ শান্তো ভদ্রঃ সমঞ্জয়ঃ ।

ভূশায়ী ভূতকৃদ্ভূতির্ভূষণো ভূতভাবনঃ ॥ ১২০॥

অকাযো ভক্তকাযস্থঃ কালজ্ঞানী মহাপটুঃ ।

পরার্ধবৃত্তিরচলো বিবিক্তঃ শ্রুতিসাগরঃ ॥ ১২১॥

স্বভাবভদ্রো মধ্যস্থঃ সংসারভযনাশনঃ ।

বেদ্যো বৈদ্যো বিযদ্গোপ্তা সর্বামরমুনীশ্বরঃ ॥ ১২২॥

সুরেন্দ্রঃ কারণং কর্মকরঃ কর্মী হ্যধোক্ষজঃ ।

ধৈর্যোঽগ্রধুর্যো ধাত্রীশঃ সঙ্কল্পঃ শর্বরীপতিঃ ॥ ১২৩॥

পরমার্থগুরুর্দৃষ্টিঃ সুচিরাশ্রিতবৎসলঃ ।

বিষ্ণুর্জিষ্ণুর্বিভুর্যজ্ঞো যজ্ঞেশো যজ্ঞপালকঃ ॥ ১২৪॥

প্রভুর্বিষ্ণুর্গ্রসিষ্ণুশ্চ লোকাত্মা লোকপালকঃ ।

কেশবঃ কেশিহা কাব্যঃ কবিঃ কারণকারণম্ ॥ ১২৫॥

কালকর্তা কালশেষো বাসুদেবঃ পুরুষ্টুতঃ ।

আদিকর্তা বরাহশ্চ বামনো মধুসূদনঃ ॥ ১২৬॥

নারাযণো নরো হংসো বিষ্বক্সেনো জনার্দনঃ ।

বিশ্বকর্তা মহাযজ্ঞো জ্যোতিষ্মান্পুরুষোত্তমঃ ॥ ১২৭॥ 700

বৈকুণ্ঠঃ পুণ্ডরীকাক্ষঃ কৃষ্ণঃ সূর্যঃ সুরার্চিতঃ ।

নারসিংহো মহাভীমো বজ্রদংষ্ট্রো নখাযুধঃ ॥ ১২৮॥

আদিদেবো জগৎকর্তা যোগীশো গরুডধ্বজঃ ।

গোবিন্দো গোপতির্গোপ্তা ভূপতির্ভুবনেশ্বরঃ ॥ ১২৯॥

পদ্মনাভো হৃষীকেশো ধাতা দামোদরঃ প্রভুঃ ।

ত্রিবিক্রমস্ত্রিলোকেশো ব্রহ্মেশঃ প্রীতিবর্ধনঃ ॥ ১৩০॥

সংন্যাসী শাস্ত্রতত্ত্বজ্ঞো মন্দিরো গিরিশো নতঃ ।

বামনো দুষ্টদমনো গোবিন্দো গোপবল্লভঃ ॥ ১৩১॥

ভক্তপ্রিয়োঽচ্যুতঃ সত্যঃ সত্যকীর্তির্ধৃতিঃ স্মৃতিঃ ।

কারুণ্যঃ করুণো ব্যাসঃ পাপহা শান্তিবর্ধনঃ ॥ ১৩২॥

বদরীনিলযঃ শান্তস্তপস্বী বৈদ্যুতঃ প্রভুঃ ।

ভূতাবাসো মহাবাসো শ্রীনিবাসঃ শ্রিয়ঃ পতিঃ ॥ ১৩৩॥

তপোবাসো মুদাবাসঃ সত্যবাসঃ সনাতনঃ ।

পুরুষঃ পুষ্করঃ পুণ্যঃ পুষ্করাক্ষো মহেশ্বরঃ ॥ ১৩৪॥

পূর্ণমূর্তিঃ পুরাণজ্ঞঃ পুণ্যদঃ প্রীতিবর্ধনঃ ।

পূর্ণরূপঃ কালচক্রপ্রবর্তনসমাহিতঃ ॥ ১৩৫॥

নারাযণঃ পরঞ্জ্যোতিঃ পরমাত্মা সদাশিবঃ ।

শঙ্খী চক্রী গদী শার্ঙ্গী লাঙ্গলী মুসলী হলী ॥ ১৩৬॥

কিরীটী কুণ্ডলী হারী মেখলী কবচী ধ্বজী ।

যোদ্ধা জেতা মহাবীর্যঃ শত্রুঘ্নঃ শত্রুতাপনঃ ॥ ১৩৭॥

শাস্তা শাস্ত্রকরঃ শাস্ত্রং শঙ্করঃ শঙ্করস্তুতঃ ।

সারথী সাত্ত্বিকঃ স্বামী সামবেদপ্রিযঃ সমঃ ॥ ১৩৮॥ 400

পবনঃ সংহিতঃ শক্তিঃ সম্পূর্ণাঙ্গঃ সমৃদ্ধিমান্ ।

স্বর্গদঃ কামদঃ শ্রীদঃ কীর্তিদঃ কীর্তিদাযকঃ ॥ ১৩৯॥

মোক্ষদঃ পুণ্ডরীকাক্ষঃ ক্ষীরাব্ধিকৃতকেতনঃ ।

সর্বাত্মা সর্বলোকেশঃ প্রেরকঃ পাপনাশনঃ ॥ ১৪০॥

বৈকুণ্ঠঃ পুণ্ডরীকাক্ষঃ সর্বদেবনমস্কৃতঃ ।

সর্বব্যাপী জগন্নাথঃ সর্বলোকমহেশ্বরঃ ॥ ১৪১॥

সর্গস্থিত্যন্তকৃদ্দেবঃ সর্বলোকসুখাবহঃ ।

অক্ষযঃ শাশ্বতোঽনন্তঃ ক্ষযবৃদ্ধিবিবর্জিতঃ ॥ ১৪২॥

নির্লেপো নির্গুণঃ সূক্ষ্মো নির্বিকারো নিরঞ্জনঃ ।

সর্বোপাধিবিনির্মুক্তঃ সত্তামাত্রব্যবস্থিতঃ ॥ ১৪৩॥

অধিকারী বিভুর্নিত্যঃ পরমাত্মা সনাতনঃ ।

অচলো নিশ্চলো ব্যাপী নিত্যতৃপ্তো নিরাশ্রয়ঃ ॥ ১৪৪॥

শ্যামী যুবা লোহিতাক্ষো দীপ্ত্যা শোভিতভাষণঃ ।

আজানুবাহুঃ সুমুখঃ সিংহস্কন্ধো মহাভুজঃ ॥ ১৪৫॥

সত্ত্ববান্ গুণসম্পন্নো দীপ্যমানঃ স্বতেজসা ।

কালাত্মা ভগবান্ কালঃ কালচক্রপ্রবর্তকঃ ॥ ১৪৬॥

নারায়ণঃ পরঞ্জ্যোতিঃ পরমাত্মা সনাতনঃ ।

বিশ্বকৃদ্বিশ্বভোক্তা চ বিশ্বগোপ্তা চ শাশ্বতঃ ॥ ১৪৭॥

বিশ্বেশ্বরো বিশ্বমূর্তির্বিশ্বাত্মা বিশ্বভাবনঃ ।

সর্বভূতসুহৃচ্ছান্তঃ সর্বভূতানুকম্পনঃ ॥ ১৪৮॥

সর্বেশ্বরঃ সর্বশর্বঃ সর্বদাঽঽশ্রিতবৎসলঃ ।

সর্বগঃ সর্বভূতেশঃ সর্বভূতাশযস্থিতঃ ॥ ১৪৯॥

অভ্যন্তরস্থস্তমসশ্ছেত্তা নারাযণঃ পরঃ ।

অনাদিনিধনঃ স্রষ্টা প্রজাপতিপতির্হরিঃ ॥ ১৫০॥

নরসিংহো হৃষীকেশঃ সর্বাত্মা সর্বদৃগ্বশী ।

জগতস্তস্থুষশ্চৈব প্রভুর্নেতা সনাতনঃ ॥ ১৫১॥ 900

কর্তা ধাতা বিধাতা চ সর্বেষাং পতিরীশ্বরঃ ।

সহস্রমূর্ধা বিশ্বাত্মা বিষ্ণুর্বিশ্বদৃগব্যয়ঃ ॥ ১৫২॥

পুরাণপুরুষঃ শ্রেষ্ঠঃ সহস্রাক্ষঃ সহস্রপাত্ ।

তত্ত্বং নারাযণো বিষ্ণুর্বাসুদেবঃ সনাতনঃ ॥ ১৫৩॥

পরমাত্মা পরংব্রহ্ম সচ্চিদানন্দবিগ্রহঃ ।

পরঞ্জ্যোতিঃ পরন্ধাম পরাকাশঃ পরাৎপরঃ ॥ ১৫৪॥

অচ্যুতঃ পুরুষঃ কৃষ্ণঃ শাশ্বতঃ শিব ঈশ্বরঃ ।

নিত্যঃ সর্বগতঃ স্থাণু রুদ্রঃ সাক্ষী প্রজাপতিঃ ॥ ১৫৫॥

হিরণ্যগর্ভঃ সবিতা লোককৃল্লোকভুগ্বিভুঃ ।

Oঙ্কারবাচ্যো ভগবান্ শ্রীভূলীলাপতিঃ প্রভুঃ ॥ ১৫৬॥

সর্বলোকেশ্বরঃ শ্রীমান্ সর্বজ্ঞঃ সর্বতোমুখঃ ।

স্বামী সুশীলঃ সুলভঃ সর্বগঃ সর্বশক্তিমান্ ॥ ১৫৭॥

নিত্যঃ সম্পূর্ণকামশ্চ নৈসর্গিকসুহৃৎসুখী ।

কৃপাপীযূষজলধিঃ শরণ্যঃ সর্বশক্তিমান্ ॥ ১৫৮॥

শ্রীমান্নারাযণঃ স্বামী জগতাং প্রভুরীশ্বরঃ ।

মৎস্যঃ কূর্মো বরাহশ্চ নারসিংহোঽথ বামনঃ ॥ ১৫৯॥

রামো রামশ্চ কৃষ্ণশ্চ বৌদ্ধঃ কল্কী পরাৎপরঃ ।

অযোধ্যেশো নৃপশ্রেষ্ঠঃ কুশবালঃ পরন্তপঃ ॥ ১৬০॥

লববালঃ কঞ্জনেত্রঃ কঞ্জাঙ্ঘ্রিঃ পঙ্কজাননঃ ।

সীতাকান্তঃ সৌম্যরূপঃ শিশুজীবনতৎপরঃ ॥ ১৬১॥

সেতুকৃচ্চিত্রকূটস্থঃ শবরীসংস্তুতঃ প্রভুঃ ।

যোগিধ্যেযঃ শিবধ্যেযঃ শাস্তা রাবণদর্পহা ॥ ১৬২॥

শ্রীশঃ শরণ্যো ভূতানাং সংশ্রিতাভীষ্টদাযকঃ ।

অনন্তঃ শ্রীপতী রামো গুণভৃন্নির্গুণো মহান্ ॥ ১৬৩॥ 1000

এবমাদীনি নামানি হ্যসঙ্খ্যান্যপরাণি চ ।

একৈকং নাম রামস্য সর্বপাপপ্রণাশনম্ ॥ ১৬৪॥

সহস্রনামফলদং সর্বৈশ্বর্যপ্রদাযকম্ ।

সর্বসিদ্ধিকরং পুণ্যং ভুক্তিমুক্তিফলপ্রদম্ ॥ ১৬৫॥

মন্ত্রাত্মকমিদং সর্বং ব্যাখ্যাতং সর্বমঙ্গলম্ ।

উক্তানি তব পুত্রেণ বিঘ্নরাজেন ধীমতা ॥ ১৬৬॥

সনৎকুমারায় পুরা তান্যুক্তানি মযা তব ।

যঃ পঠেচ্ছৃণুযাদ্বাপি স তু ব্রহ্মপদং লভেত্ ॥ ১৬৭॥

তাবদেব বলং তেষাং মহাপাতকদন্তিনাম্ ।

যাবন্ন শ্রূযতে রামনামপঞ্চাননধ্বনিঃ ॥ ১৬৮॥

ব্রহ্মঘ্নশ্চ সুরাপশ্চ স্তেযী চ গুরুতল্পগঃ ।

শরণাগতঘাতী চ মিত্রবিশ্বাসঘাতকঃ ॥ ১৬৯॥

মাতৃহা পিতৃহা চৈব ভ্রূণহা বীরহা তথা ।

কোটিকোটিসহস্রাণি হ্যুপপাপানি যান্যপি ॥ ১৭০॥

সংবৎসরং ক্রমাজ্জপ্ত্বা প্রত্যহং রামসন্নিধৌ ।

নিষ্কণ্টকং সুখং ভুক্ত্বা ততো মোক্ষমবাপ্নুযাত্ ॥ ১৭১॥

শ্রীরামনাম্নাং পরমং সহস্রকং পাপাপহং সৌখ্যবিবৃদ্ধিকারকম্ ।

ভবাপহং ভক্তজনৈকপালকং স্ত্রীপুত্রপৌত্রপ্রদমৃদ্ধিদাযকম্ ॥

ইতি শ্রীশতকোটিরামচরিতান্তর্গতে শ্রীমদানন্দরামাযণে বাল্মীকীযে

রাজ্যকাণ্ডে পূর্বার্ধে শ্রীরামসহস্রনামকথনং নাম প্রথমঃ সর্গঃ ॥

]hrule

Encoded and poofread by PSA Easwaran psaeaswaran at gmail

Verse numbers are as per the Ananda Ramayana and have not been reset to start with 1.

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Rama Sahasranama Stotram ( From Ananda Ramayana ) Lyrics in Bengali PDF
% File name : rama1000Ananda.itx
% Category : sahasranAma
% Location : doc_raama
% Author : Valmiki
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : PSA Easwaran psaeaswaran at gmail
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description/comments : shrImadAnandarAmAyaNe rAjyakANDe pUrvArdhe prathamaH sargaH
% Latest update : September 6, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 9, 2015 ] at Stotram Website